श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री वीरराघवाष्टोत्तरशतनामस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री वीरराघवाष्टोत्तरशतनामस्तोत्रम् ॥

मार्कण्डेयः
शम्भो शङ्करसर्वज्ञ सर्वभूतहितं कर।
श्री वीरराघवविभोः वीक्षावनविहारिणः॥

नाम्नामष्टोत्तरशतं श्रोतुमिच्छामि तत्त्वतः।
तस्मात्तदुपदेष्टुं च त्वमर्हसि दयानिधे॥

ईश्वरः
मार्कण्डेय महाप्राज्ञ शृणु गुह्यं सनातनम्।
वीक्षावनान्तसञ्चाररसिकस्य महाप्रभोः॥

हृत्तापनाशनसरस्तीरविश्रान्तिकारिणः।
शालिहोत्रमहायोगिसाक्षात्कृतजगत्पतेः॥

वीरराघववैद्यस्य नाम्नामष्टोत्तरं शतम्।
सर्वक्षेमप्रदं दिव्यं सर्वपापप्रणाशनम्॥

सर्वैश्वर्यप्रदं सर्वसंसारव्याधिभेषजम्।
बहुनाऽथ किमुक्तेन चैहिकामुष्मिकप्रदम्॥

श्री वीरराघवाष्टोत्तरशतनामस्तोत्रमहामन्त्रस्य।
अगस्त्यऋषिः।
अनुष्टुप्छन्दः।
श्री महाविष्णुः परमात्मा श्रीमन्नारायणो देवता।
रामित्यादि अङ्गन्यासं करन्यासञ्च॥

## ध्यानम्

रागादिरोगान् सततानुषक्तान् अशेषकायप्रसृतानशेषान्।
औत्सुक्यमोहारतितान्जघान योऽपूर्ववैद्याय नमोऽस्तु तस्मै॥

श्रीवीरराघवः श्रीमान् श्री किंगृहपुराधिपः।
वीक्षावनान्तसञ्चारविहाररसिको हरिः॥ 1 ॥

श्रीभूसंवाहितपदः पुण्डरीकायतेक्षणः।
हृत्तापनाशनसरस्तीरवासविलोलहृत्॥ 2 ॥

विजयायतनो जैत्रो मधुकैटभभञ्जनः।
सहस्रानीकराजेन्द्रसमर्चितपदाम्बुजः॥ 3 ॥

सर्वाश्रयस्सर्वसुहृत् सर्वभूतमनोहरः।
देवर्षिसिद्धगन्धर्वमनुष्यादिसमर्चितः॥ 4 ॥

जगन्नाथो जगद्वन्द्यः पुराणपुरुषोत्तमः।
शरण्यश्शरणश्शान्तः शालिहोत्रहविः प्रियः॥ 5 ॥

शेषतल्पशयः शार्ङ्गी शरणागतवत्सलः।
गरुडाद्यन्वितो विश्वः गम्भीरमधुराकृतिः॥ 6 ॥

सुनासस्सुमुखस्सुभ्रूः सुस्मिताधरविद्रुमः।
शालिहोत्रशिरोन्यस्तदक्षिणश्रीकराम्बुजः॥ 7 ॥

विशालोत्तुङ्गवक्षास्तु विपुलांसो महाभुजः।
ज्ञानमुद्राङ्कितकरो मार्कण्डेयसमर्चितः॥ 8 ॥

नाभीनलिनसंभूतब्रह्मसंशयनोदनः।
सुदीर्घोत्तुङ्गमुकुटः वितानभुजगाधिपः॥ 9 ॥

चित्रकर्मा चित्रलीलः चित्रबिन्दुपटावृतः।
लोकोज्जीवनविन्यस्तश्रीपादजलजद्वयः॥ **10** ॥

महेन्द्रनीलशैलाभो मदनायितसुन्दरः।
मन्दस्मितलसद्वक्त्रो वक्षो विनिहितेन्दिरः॥ **11** ॥

भूषायितदरारीन्द्रो भूलोकोत्तरभूषणः।
सनत्कुमारादिसिद्धसपर्यातुष्टमानसः॥ **12** ॥

लावण्यामृतवाराशिः रक्षिताहितराक्षसः।
स्वक्षेत्रमहिमाधूतयमकिङ्करबाधनः॥ **13** ॥

पुरुषः पूर्वजः पुण्यः पुष्यदर्शार्चनप्रियः।
परश्च परमार्थश्च परमात्मा परात्परः॥ **14** ॥

विश्वेश्वरो विश्वाधारः कौशिकद्विजमोक्षदः।
ब्रह्मरुद्रमहेन्द्रात्मा सर्वदेवगणस्तुतः॥ **15** ॥

धर्मार्थकामकैवल्यसकलाभीप्सितप्रदः।
आपन्नत्राणनिरतः सर्वोपद्रवनाशनः। १६ ॥

सन्तानदानसन्तानः सर्वप्रत्यक्षदैवतः।
शर्करापिष्टसम्मोदी स्वांशपालितनिर्झरः॥ **17** ॥

धर्मसेनमहाराजधन्यताप्राप्तिकारणः।
कुमारः काम्यवाक्कामः काम्यः कामप्रदायकः॥ **18** ॥

कान्तो वसुमतीकान्तः करांबुजकृताभयः।
विधेर्नियोजकश्चैव कलशोदधिकल्पनः॥ **19** ॥

शङ्करात्मा शङ्करः शङ्करश्शङ्करार्चितः।
प्रद्युम्नसदयस्सर्वतीर्थाधिकसरः प्रियः॥ **20** ॥

भक्तात्मा भक्तवश्यश्च भक्तन्यासवशंवदः।
अजः च जितकाशी च अम्बरीषार्तिवारणः॥ 21 ॥

दुर्वासोदर्पदलनद्युमणिद्युतिहेतिराट्।
देवनाथो देवभोग्यः देवभागसमर्चितः॥ 22 ॥

पुरुपुण्यप्रसन्नात्मा सत्यवत्यात्मजः प्रियः।
वृद्धब्राह्मणरूपी च शालिहोत्रसमर्चितः॥ 23 ॥

श्री किंगृहपुरिक्षेत्रप्रतिष्ठापरिनिष्ठितः।
युक्तः कनकवल्याख्यदेव्या श्री वीरराघवः॥ 24 ॥

शालिहोत्रसदावन्द्यचरणद्वयशोभितः।
सर्वेषां च मनुष्याणां चरणत्राणतत्परः॥ 25 ॥

शेतेऽद्यापि महाबुद्धे भुजङ्गशयने विभुः।
विराजते महायोगिन् सर्वाभीष्टफलप्रदः॥ 26 ॥

श्री वीरराघवस्येदं नाम्नामष्टोत्तरं शतम्।
यः पठेत् शृणुयाद्वापि तस्य सर्वं करस्थितम्॥ 27 ॥

सर्वसंपत्करं पुण्यं सर्वव्याधिनिवारणम्।
सर्वार्थानत्र लब्ध्वैव पश्चान्मोक्षे महीयते॥ 28 ॥

वीक्षारण्ये जगत्पुण्ये स्नात्वा हृत्तापनाशने।
विजयञ्च विमानञ्च दृष्ट्वा येऽर्चन्ति मानवाः॥ 29 ॥

अर्घ्यपुष्पादिभिर्नित्यं शयानं मधुसूदनम्।
ते यान्ति परमं स्थानं यद्वै पश्यन्ति सूरयः॥ 30 ॥

॥ इति श्री वीरराघवाष्टोत्तरशतनामस्तोत्रं समाप्तम्॥